देवेन्द्र मिश्रः शिक्षकः
संस्कृतविभागाध्यक्षः
सुन्दरवनमहाविद्यालयस्य

Scanned with CamScanner

अथ:

समासः

⇒ समासा एकशेषाश्च तद्धिताश्च कृतस्तथा ।
समाहारो धातवश्च वृत्तयः पञ्चधा मताः ।।

↓

'परार्थाभिधानं वृत्तिः' ।
(यथा - राजपुरुषः)

वस्तुतः पञ्चवृत्तयः । तन्मध्ये समासः अत्यन्तमः ।

↳ सम् - √अस् (क्षिपादिगणे) + घञ् (प्रत्ययः)

⇒ समसनम् समासः इत्यनेन समासः इति शब्दस्य अर्थः भवति 'संक्षेपः' इति । समासः तु 'पदविधिः' (पदयोः पदानां वा विधिः) परन्तु सा विधिः समर्थाश्रितः भवति । सूत्रम् यथा - 'समर्थः पदविधिः' (२।१।१)

⇒ पदद्वयस्य बहुपदस्य वा एकपदं समासः ।
(राज्ञः पुरुषः = राजपुरुषः इति)

सामर्थ्यम्

↓ अपेक्षालक्षणम्
(यथा - राज्ञः पुरुषः)

↓ एकार्थीभावलक्षणम्
(यथा - राजपुरुषः)

Scanned with CamScanner

→ विग्रहवाक्यम् / समासवाक्यम् = 'वृत्त्यर्थबोधकं वाक्यं विग्रहः'

(विशिष्टार्थप्रतिपादकम्)

विग्रहः

लौकिकविग्रहः

[राज्ञः पुरुषः
प्रयोगार्हतया साधुः]

अलौकिकविग्रहः

[राजन् अस् पुरुष सु
प्रयोगानर्हः असाधुः]

⊛ विग्रहविचारेण समासः

१) स्वपदविग्रहसमासः
(ग्रामगतः = ग्रामं गतः इति)

२) उपकृष्णम् = कृष्णस्य समीपम् इति ।
अस्वपदविग्रहसमासः ।
(अत्र समीपम् इति न समासघटकपदम्)

Scanned with CamScanner

⇒ अनन्तरं दृश्यते पदार्थप्राधान्येन —

१) प्रायेण पूर्वपदार्थप्रधानोऽव्ययीभावः । यथा - रूपस्य योग्यम् अनुरूपम् ।

२) प्रायेणोत्तरपदार्थप्रधानस्तत्पुरुषः । यथा - कृष्णम् श्रितः कृष्णाश्रितः ।

→ तत्पुरुषभेदः कर्मधारयः । कर्मधारयभेदो द्विगुः ।

३) प्रायेण अन्यपदार्थप्रधानो बहुव्रीहिः । यथा —
पीतम् अम्बरं यस्य सः = पीताम्बरः इति ।

४) प्रायेणोभयपदार्थप्रधानो द्वन्द्वः इति । यथा —
कन्दश्च मूलं च फलं च = कन्दमूलफलानि ।

⊛ एवं विशेषसंज्ञाविनिर्मुक्तो केवलसमासः ।

(अव्ययीभावादिरूपा संज्ञाभिर्विनिर्मुक्तः)

यथा — पूर्वं भूतः = भूतपूर्वः इति ।

Scanned with CamScanner

⇒ अतः समासः पञ्चधा । अपि च समासश्चतुर्विध इति प्राचीनवादः ।



Scanned with CamScanner

नित्यसमासः (पृथक्रूपेण न परिगण्यते)

अविग्रहो नित्यसमासः
(यथा – कृष्णसर्पः)

अस्वपदविग्रहो नित्यसमासः
(ज्ञानाय इदम् = ज्ञानार्थम्)

(४) ⇒ समासस्य अन्यथा षड्विधत्वम् —

"सुपां सुपा तिङा नाम्ना धातुनाथ तिङां तिङा ।
सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः ॥" इति

उदाहरणम् यथा →

१) सुपां सुपा = राजपुरुषः ,
२) सुपां तिङा = पर्यभुक्षत्
३) सुपां नाम्ना = कुम्भकारः
४) सुपां धातुना = अजस्रम्
५) तिङां तिङा = पिबतखादता , खादतमोदता
६) तिङां सुपा = कृन्नविलक्षणा इति

सर्वाधिकसम्मतम्

Scanned with CamScanner